श्रीशङ्कराचार्यभुजङ्गप्रयातस्तोत्रम्

{॥ श्रीशङ्कराचार्यभुजङ्गप्रयातस्तोत्रम् ॥}

कृपासागरायाशुकाव्यप्रदाय प्रणम्राखिलाभीष्टसन्दायकाय ।

यतीन्द्रैरुपास्याङ्घ्रिपाथोरुहाय प्रबोधप्रदात्रे नमः शङ्कराय ॥ १॥

चिदानन्दरूपाय चिन्मुद्रिकोद्यत्करायेशपर्यायरूपाय तुभ्यम् ।

मुदा गीयमानाय वेदोत्तमाङ्गैः श्रितानन्ददात्रे नमः शङ्कराय ॥ २॥

जटाजूटमध्ये पुरा या सुराणां धुनी साद्य कर्मन्दिरूपस्य शम्भोः ।

गले मल्लिकामालिकाव्याजतस्ते विभातीति मन्ये गुरो किं तथैव ॥ ३॥

नखेन्दुप्रभाधूतनम्रालिहार्दान्धकारव्रजायाब्जमन्दस्मिताय ।

महामोहपाथोनिधेर्बाडबाय प्रशान्ताय कुर्मो नमः शङ्कराय ॥ ४॥

प्रणम्रान्तरङ्गाब्जबोधप्रदात्रे दिवारात्रमव्याहतोस्राय कामम् ।

क्षपेशाय चित्राय लक्ष्मक्षयाभ्यां विहीनाय कुर्मो नमः शङ्कराय ॥ ५॥

प्रणम्रास्यपाथोजमोदप्रदात्रे सदान्तस्तमस्तोमसंहारकर्त्रे ।

रजन्यामपीद्धप्रकाशाय कुर्मो ह्यपूर्वाय पूष्णे नमः शङ्कराय ॥ ६॥

नतानां हृदब्जानि फुल्लानि शीघ्रं करोम्याशु योगप्रदानेन नूनम् ।

Stotram Digitalized By Sanskritdocuments.org

प्रबोधाय चेत्थं सरोजानि धत्से प्रफुल्लानि किं भो गुरो ब्रूहि मह्यम् ॥ ७॥

प्रभाधूतचन्द्रायुतायाखिलेष्टप्रदायानतानां समूहाय शीघ्रम्।

प्रतीपाय नम्रौघदुःखाघपङ्क्तेर्मुदा सर्वदा स्यान्नमः शङ्कराय ॥ ८॥

विनिष्कासितानीश तत्त्वावबोधान्नतानां मनोभ्यो ह्यनन्याश्रयाणि ।

रजांसि प्रपन्नानि पादाम्बुजातं गुरो रक्तवस्त्रापदेशाद्बिभर्षि ॥ ९॥

मतेर्वेदशीर्षाध्वसम्प्रापकायानतानां जनानां कृपार्द्रैः कटाक्षैः ।

ततेः पापबृन्दस्य शीघ्रं निहन्त्रे स्मितास्याय कुर्मो नमः शङ्कराय ॥ १०॥

सुपर्वोक्तिगन्धेन हीनाय तूर्णं पुरा तोटकायाखिलज्ञानदात्रे ।

प्रवालीयगर्वापहारस्य कर्त्रे पदाब्जम्रदिम्ना नमः शङ्कराय ॥ ११॥

भवाम्भोधिमग्नाञ्जनान्दुःखयुक्ताञ्जवादुद्दिधीर्षुर्भवानित्यहोऽहम् ।

विदित्वा हि ते कीर्तिमन्यादृशां भो सुखं निर्विशङ्कः स्वपिम्यस्तयत्नः ॥ १२॥

॥ इति श्रीसच्चिदानन्द-शिवाभिनव-नृसिंहभारती महास्वामिभिः श्रीकालटिक्षेत्रे

विरचितं श्रीशङ्कराचार्यभुजङ्गप्रयातस्तोत्रं सम्पूर्णम् ॥

Encoded by Ramakrishna Upadrasta uramakrishna at gmail.com

Proofread by Ramakrishna Upadrasta, Sunder Hattangadi

Please send corrections to sanskrit@cheerful.com

Last updated ṭoday

http://sanskritdocuments.org

Sri Shankaracharya Bhujanga Prayata Stotram Lyrics in Devanagari PDF
% File name : shankarAchAryabhujangaprayAtastotra.itx
% Category : bhujanga
% Location : doc_deities_misc
% Author : sachchidAnanda-shivAbhinava-nRisiMhabhAratI mahAsvAmibhiH
% Language : Sanskrit
% Subject : hinduism
% Transliterated by : Ramakrishna Upadrasta uramakrishna at gmail.com
% Proofread by : Sunder Hattangadi sunderh at hotmail.com Ramakrishna Upadrasta
% Latest update : May 21, 2012
% Send corrections to : Sanskrit@cheerful.com
% Site access : http://sanskritdocuments.org
%
% This text is prepared by volunteers and is to be used for personal study
% and research. The file is not to be copied or reposted for promotion of
% any website or individuals or for commercial purpose without permission.
% Please help to maintain respect for volunteer spirit.
%

We acknowledge well-meaning volunteers for Sanskritdocuments.org and other sites to have built the collection of Sanskrit texts.
Please check their sites later for improved versions of the texts.
This file should strictly be kept for personal use.
PDF file is generated [December 15, 2015] at Stotram Website